# ॥ वाल्मीकि रामायण॥

## ७ उत्तरकाण्ड

## अध्याय ९३

कस्य चित्त्वथ कालस्य रामे धर्मपथे स्थिते ।
कालस्तापसरूपेण राजद्वारमुपागमत् ॥ १॥

सोऽब्रवील्लक्ष्मणं वाक्यं धृतिमन्तं यशस्विनम् ।
मां निवेदय रामाय सम्प्राप्तं कार्यगौरवात् ॥ २॥

दूतो ह्यतिबलस्याहं महर्षेरमितौजसः ।
रामं दिदृक्षुरायातः कार्येण हि महाबल ॥ ३॥

तस्य तद्वचनं श्रुत्वा सौमित्रिस्त्वरयान्वितः ।
न्यवेदयत रामाय तापसस्य विवक्षितम् ॥ ४॥

जयस्व राजन्धर्मेण उभौ लोकौ महाद्युते ।
दूतस्त्वां द्रष्टुमायातस्तपस्वी भास्करप्रभः ॥ ५॥

तद्वाक्यं लक्ष्मणेनोक्तं श्रुत्वा राम उवाच ह ।
प्रवेश्यतां मुनिस्तात महौजास्तस्य वाक्यधृक् ॥ ६॥

सौमित्रिस्तु तथेत्युक्त्वा प्रावेशयत तं मुनिम् ।
ज्वलन्तमिव तेजोभिः प्रदहन्तमिवांशुभिः ॥ ७॥

सोऽभिगम्य रघुश्रेष्ठं दीप्यमानं स्वतेजसा ।
ऋषिर्मधुरया वाचा वर्धस्वेत्याह राघवम् ॥ ८॥

तस्मै रामो महातेजाः पूजामर्घ्यं पुरोगमाम् ।
ददौ कुशलमव्यग्रं प्रष्टुं चैवोपचक्रमे ॥ ९॥

पृष्टश्च कुशलं तेन रामेण वदतां वरः ।
आसने काञ्चने दिव्ये निषसाद महायशाः ॥ १०॥

तमुवाच ततो रामः स्वागतं ते महामुने ।
प्रापयस्व च वाक्यानि यतो दूतस्त्वमागतः ॥ ११॥

चोदितो राजसिंहेन मुनिर्वाक्यमुदीरयत् ।
द्वन्द्वमेतत्प्रवक्तव्यं न च चक्षुर्हतं वचः ॥ १२॥

यः शृणोति निरीक्षेद्वा स वध्यस्तव राघव ।
भवेद्वै मुनिमुख्यस्य वचनं यद्यवेक्षसे ॥ १३॥

तथेति च प्रतिज्ञाय रामो लक्ष्मणमब्रवीत् ।
द्वारि तिष्ठ महाबाहो प्रतिहारं विसर्जय ॥ १४॥

स मे वध्यः खलु भवेत्कथां द्वन्द्वसमीरिताम् ।
ऋषेर्मम च सौमित्रे पश्येद्वा शृणुया च यः ॥ १५॥

ततो निक्षिप्य काकुत्स्थो लक्ष्मणं द्वारसङ्ग्रहे ।
तमुवाच मुनिं वाक्यं कथयस्वेति राघवः ॥ १६॥

यत्ते मनीषितं वाक्यं येन वासि समाहितः ।
कथयस्व विशङ्कस्त्वं ममापि हृदि वर्तते ॥ १७॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com